संस्कृत-वार्ता:
10/09/2024
सायम् - 06:20

<u>मुख्यवार्ता:</u>

- अद्य नवदिल्ल्यां नवनिर्मितस्य अनुसन्धान-राष्ट्रिय-अनुसन्धान-प्रतिष्ठिकाइत्यस्य प्रथम-शासी-मण्डल-सभायाः अध्यक्षता प्रधानमन्त्रिणा कृता।
- केन्द्रीय: गृहमन्त्री अमितशाहः अवोचत् यत् आगामिषु पञ्चवर्षेषु आन्तर्जालिक - अपराधस्य निवारणार्थं पञ्च सहस्रं यावत् अन्तर्जालपरिरक्षकान् प्रशिक्षयितुं केन्द्रस्य योजना अस्ति इति।
- उत्तराखण्डराज्यस्य सोनप्रयागस्य समीपे केदारनाथ-राष्ट्रिय-राजमार्गे प्रचण्डवृष्ट्या उद्भूतेन भूस्खलनेन पञ्च तीर्थयात्रिणः मृताः, त्रयः च व्रणिताः अभवन्।
- भारतेन संयुक्तराष्ट्रस्य स्थायिसदस्यताम् इतोऽपि अधिकं प्रतिनिधित्वपूर्णम् निर्मातुम् आह्वानं कृतम् विशिष्टरूपेण अफ़्रिकादेशस्य सहभागितया सह इति।
- वियतनामदेशीयेन कृषि-ग्रामीण-विकास-मन्त्रालयेन प्रख्यापितं यत् प्रचण्ड-चक्रवातात् यागी-इत्यस्मात् मृतकानां संख्या आहत्य पञ्चषष्टि: जाता।

<u>प्रधानमन्त्री- अनुसन्धानम्</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना वैश्विकसमस्यानां स्थानीयसमाधानस्य विषये अवधानं दत्तम्। अद्य नवदिल्ल्यां नवनिर्मितस्य अनुसन्धान-राष्ट्रिय-अनुसन्धान-प्रतिष्ठिका इत्यस्य प्रथमस्य शासी-मण्डल-सभायाः अध्यक्षता प्रधानमन्त्रिणा कृता। सभायां प्रधानमन्त्रिणा अनुसंधानव्यवस्थायाः मार्गस्य बाधकान् चिन्वन्तु तथा च एतेषां समस्यानां निवारणार्थं उपायान् कर्तुम् आदिष्टम्। सः अवदत् यत् विद्यमानानां समस्यानां नूतनानि समाधानानि अन्वेष्टुं संशोधनं केन्द्रितम् भवेत् इति। संस्थानां उन्नयनस्य, मानकीकरणस्य च आह्वानम्, प्रधानमन्त्रिणा सूचितम् ।

<u>आन्तर्जालिक-सुरक्षा -राष्ट्रियसुरक्षा</u>

केन्द्रीय: गृहमन्त्री अमितशाहः अद्य आन्तर्जालिक-सुरक्षा राष्ट्रियसुरक्षायाः अभिन्नः भागः इति अवोचत् | असौ अकथयत् यत् आगामिषु पञ्चवर्षेषु आन्तर्जालिक -अपराधस्य निवारणार्थं पञ्च सहस्रं यावत् अन्तर्जालपरिरक्षकान् प्रशिक्षयितुं केन्द्रस्य योजना अस्ति इति। नवदिल्ल्यां भारतीय-आन्तर्जालिक-अपराध-समन्वय-केन्द्रस्य प्रथमम् स्थापना-दिवस-समारोहं सम्बोधयन् सः एतत् उक्तवान्।

श्रीशाह: न्यगादीत् यत् आन्तर्जालिक -सुरक्षां विना देशस्य प्रगतिः न शक्यते इति। आन्तर्जालिक-अपराधस्य सीमा नास्ति इत्यनेन कारणेनापि सः सर्वान् हितधारकान् अस्य विपद्-निवारणे एकत्र आगन्तुम् आदिष्टवान्।

विभिन्नेषु क्षेत्रेषु अन्तर्जालस्य वर्धितस्य उपयोगस्य विषये प्रकाशयन्, मन्त्री अवदत् यत् देशे प्रतिदिनम् आङ्ककिय -व्यवहारस्य आङ्ककिय -दत्तांशस्य उपयोगः च वर्धमानः अस्ति येन हि आन्तर्जालिक-सुरक्षायां संलग्नानां जनानां दायित्वानि वर्धितानि सन्ति। श्री शाह: अग्रे अपि अवदत् यत् सद्यः प्रवर्तितेषु त्रिषु नूतन-आपराधिक-विधिषु देशे आन्तर्जालिक-अपराधसम्बद्ध-समस्यानां निवारणार्थं पर्याप्तानि प्रावधानानि सन्ति। अस्मिन् अवसरे मन्त्री आन्तर्जालिक- अपराधात् रक्षणार्थं प्रमुखान् उपक्रमान् उद्घाटितवान् तथा च साइबर्-फ्राड्-मिटिगेशन्-केन्द्रम् इति राष्ट्राय समर्पितवान्। सः जाल-आधारितं घटकसमन्वयं प्रारब्धवान्, यत् साइबर्-अपराध-दत्तांश-भण्डारस्य, आदानप्रदानस्य, मानचित्रणस्य, विश्लेषणस्य च मञ्चः, तथा च विधि-प्रवर्तन-संस्थानां समन्वय-साधनम् इति । मन्त्रिणा आन्तर्जालिक-सुरक्षाम् वर्धयितुं राज्येषु, केन्द्र-शासित-प्रदेशेषु, केन्द्रीय-आरक्षक-सङ्घेषु च प्रशिक्षित-विशेषज्ञानां शाखां स्थापयन् अन्तर्जालपरिरक्षक-कार्यक्रमः अपि उद्घाटितः।

<u>उत्तराखण्डराज्यात्मोचनबलं</u>

उत्तराखण्डराज्यस्य उत्तरे भागे गतरात्रौ केदारनाथ-राष्ट्रिय-राजमार्गे सोनप्रयागस्य समीपे प्रचण्डवृष्ट्या उद्भूतेन भूस्खलनेन पञ्च तीर्थयात्रिणः मृताः, त्रयः च व्रणिताः अभवन्। राष्ट्रीयापत्मोचनबलं ,राज्यात्मोचनबलं , स्थानीय-आरक्षकाः च संयुक्त-साहाय्योद्धार-कार्याणि प्रारब्धवन्तः, सर्वे शवा: च प्राप्ताः । व्रणिताः तीर्थयात्रिणः पी. एच्. सी. इत्यस्मिन् केन्द्रे उपचाराधीनाः वर्तन्ते ।मृतकेषु मध्यप्रदेशस्य त्रयः, गुजरातस्य एकः, नेपालस्य एकः च जनाः सन्ति। मुख्यमन्त्री पुष्कर् सिङ्घ् धामी इत्ययं दुर्घटनायाः विषये गभीरं दुःखं प्रकटितवान्।

<u>भारतेन संयुक्तराष्ट्रस्य</u>

भारतेन संयुक्तराष्ट्रस्य स्थायिसदस्यताम् इतोऽपि अधिकं प्रतिनिधित्वपूर्णम् निर्मातुम् आह्वानं कृतम् विशिष्टरूपेण अफ्रिकादेशस्य सहभागितया सह इति। भारतेन उल्लिखितः यत् सुरक्षापरिषदि राजनीतिक मतभेद: शांति-अभियानानि प्रभावितानि कुर्वन्ति । ह्यः सुरक्षापरिषदि स्वीयं प्रथमं संबोधयन् संयुक्तराष्ट्रे भारतस्य नवनियुक्त: स्थायिप्रतिनिधि: पी. हरीश: कथितवान् सुरक्षापरिषदि राजनीतिकसामञ्जस्य अल्पतास्ति । येन हि संयुक्तराष्ट्रस्य शांति -अभियानेषु प्रतिकूलप्रभाव: पतितः।

<u>जयशङ्करः - जर्मनीयात्रा</u>

विदेशमन्त्री एस. जयशंकरः अद्यारभ्य जर्मनीदेशस्य द्विदिवसीययात्रां प्रति याति । डॉ जयशंकरः द्विपक्षीय-सम्बन्धानां सम्पूर्णायामानां समीक्षायै अथ च सहयोगस्य अवसरम् अन्वेष्टुं बर्लिननगरे जर्मनीदेशीयेन विदेशमन्त्रिणा अन्यैः प्रमुखैः नेतृभिः सह मेलनं करिष्यति। अत्रावधौ अस्माकं वार्ताहरेण सूचितं यत् जर्मनीदेशः भारतस्य महत्त्पूर्ण-व्यापारिक - सहकारेषु अन्यतमो विद्यते अपि च प्रत्यक्ष-विदेशी-निवेशस्य प्रमुखस्रोतो वर्तते। इतः प्राक् ह्यः डॉ जयशङ्करः रियादनगरे रणनीतिक-वार्तायाः कृते भारत-खाति-सहयोग-परिषदः संयुक्तस्य मन्त्रिस्तरीयस्य उपवेशनस्य सहाध्यक्षतां विहितवान्। अनेन अत्रावसरे सम्बद्धाः सदस्याः सम्प्रार्थिताः यत् तैः पारस्परिक भविष्याय निवेश: समर्थनम् च भवितव्यमिति। असौ भाषितवान् यत् गाजाक्षेत्रस्य वर्तमानस्थितिः निश्चप्रचं भारतस्य बृहत्तमा व्याकुलता वर्तते। भारतं आतङ्कवादिनां कृत्यानामपि निन्दां करोति।

<u>वियतनाम् - यागीइति</u>

वियतनामदेशीयन कृषि-ग्रामीण-विकास-मन्त्रालयेन प्रख्यापितं यत् प्रचण्ड-चक्रवातात् यागी-इत्यस्मात् जलौघसङ्कटात् भूस्खलनाच्च अद्य प्रातः देशस्य उत्तरभागे मृतकानां संख्या आहत्य पञ्चषष्टि: जाता। तत्रैव विलुप्तजनानां समग्रसंख्या नवत्रिंशत् जातास्ति इति सूच्यते। इमां दुःखावहां घटनाम् अवलोक्य वियतनामदेशीयः प्रधानमन्त्री फाम्-मिन्ह्-चिन्ह्-इत्येषः चत्वारि-मिलियनडॉलर-मितस्य साहाय्यराशेरपि घोषणां कृतवान्।

<u>फिलीपींस - भारत देशौ</u>

भारतस्य रक्षा-सचिव: गिरिधर-अरमाने इत्येष: श्व: फिलीपींस – देशस्य राजधान्यां मनीला-नगरे भारत-फिलीपींस - संयुक्त-रक्षा - सहयोग-समित्याः पञ्चमस्य उपवेशनस्य सहाध्यक्षतां करिष्यति। तदनु उपवेशनस्य अस्य सहाध्यक्षतां फिलीपींस – देशस्य राष्ट्रीय - रक्षा - मन्त्रालयस्य वरिष्ठ: अनुसचिव: इरिनियो - क्रूज़ - एस्पिनो इत्येष: अपि करिष्यति। रक्षामन्त्रालयस्यानुसारि श्री अरमानेः द्वयोः देशयोः रक्षा-सहयोगं सुदृढं कर्तुं उपायान् चर्चयिष्यति। संयुक्त - रक्षा - सहयोग - समित्या: निर्माणं फिलीपींस - भारतदेशयोः मध्ये रक्षा-सहयोगं सुदृढं कर्तुं जातमस्ति। भारत - फिलीपींस देशयोः राजनैतिक-सम्बन्धस्य पञ्चसप्तति वर्षाणां भारतस्य च एक्ट-ईस्ट-नीते: दश वर्षाणां सम्पूर्त्यवसरे अयमुत्सवः आचर्यते। एतस्मात् कारणादपि श्रीअरमाने इत्यस्य यात्रा महत्त्वपूर्णा वर्तते।

<u>हरियाणा विधानसभा निर्वाचनम्</u>

हरियाणाराज्ये आगामिने विधानसभा-निर्वाचनाय नवति आसनेभ्यः प्रायशः पञ्चत्रिंशदधिकैकशतं यावत् प्रत्याशिभिः नामाङ्कनपत्रं प्रपूरितम् । एषा नामाङ्कन प्रक्रिया मासस्यास्य द्वादश-दिनाङ्कपर्यन्तं प्रचलिष्यति। भाजपेतिदलेन साम्प्रतं यावत् सप्तषष्टिः प्रत्याशिनां नामानि घोषितानि। अपरत्र काँग्रेसदलेनापि अधुना यावत् एकचत्वारिंशत् प्रत्याशिनां सूची प्रसारिता।

पेरिस - पैरालंपिक

पेरिस - पैरालंपिक - क्रीडाकुम्भतः समागतानां भारतीय - क्रीडाकानाम् अद्य नव-दिल्ल्याः इन्दिरा-गांधी-विमानस्थानके पुष्पमालाभिः वाद्ययन्त्र-ध्वनिना च सह सोत्साहं स्वागतसत्कारो जातः। देशस्य कृते इदं उल्लेखनीयं अभियानम् आसीत् यस्मिन् सप्त सुवर्णपदकानि नव रजतपदकानि त्रयोदश कांस्यपदकानि समेत्य पदकानां सकल- संख्या नवविंशतिः जाता या हि कीर्तिमत्-रूपेण अस्माकं सम्मुखे समङ्किता।

।। इति वार्ताः।।